# 209

**I**

Total No. of Questions—**16**

Total No. of Printed Pages—**4**

**Regd. No.** | | | | | | | | | | |

**Part II**

**SANSKRIT**

**Paper II**

**(Second Language)**

***Time : 3 Hours*** ***Max. Marks : 100***

**Note :—** (1) *ALL* questions should be attempted.

(2) Question Nos. **1, 2** and **3** should be answered either in the medium of instructions of the candidate or in Sanskrit (Devanagari Script).

(3) The remaining questions should be answered in Sanskrit (Devanagari Script) only.

**सूचना :—** प्रथम, द्वितीय, तृतीय प्रश्नान् विहाय अन्ये सर्वेऽपि प्रश्नाः संस्कृतभाषायामेव समाधातव्याः।

**1.** **एकस्य** श्लोकस्य प्रतिपदार्थं भावं च लिखत– 1×8=8

(अ) प्राणायामेन युक्तेन सर्वरोग क्षयो भवेत् ।
अयुक्ताभ्यास योगेन सर्व रोगस्य सम्भवः ॥

(आ) अत्युनात पदारूढः पूज्यान्यैवावमानयेत् ।
नहुषः शक्रतामेत्य च्युतोऽगस्त्यावमाननात् ॥

**2.** **एकं** निबन्धप्रश्नं समाधत्त– 1×6=6

(अ) गङ्गावतरणे रतस्य भगीरथस्य प्रयत्नं संग्रहेण लिखत।

(आ) हरिश्चन्द्रः सत्यमेव जयते इति कथं निरूपितवान्।

**3.** **एकं** निबन्धप्रश्नं समाधत्त– 1×6=6

(अ) शुकशावकः हारीतेन कथं रक्षितः ?

(आ) दधीचिः दानवीरः कथम् अभवत् ?

4. **त्रयाणां** प्रश्नानां समाधानं लिखत— 3×2=6

(अ) भरतः कीदृशं रामं द्रष्टुमैच्छत् ?

(आ) वासुकिना गरुत्मान् किमिति अभिहितः ?

(इ) पार्वती तपः कथम् आचरति ?

(ई) गरुडेन कः त्वमिति प्रष्टः ? जीमूतवाहनः किमवदत् ?

(उ) आश्रम पदे रामः सीता लक्ष्मणः च कथं स्थिताः ?

(ऊ) चिताभस्मनः रजः अपि केन विशुद्धिमश्नुते ?

5. **द्वयोः** ससन्दर्भं व्याख्यानं लिखत— 2×3=6

(अ) मनोरथो महानेषः भगीरथ ! महारथ!

(आ) भविता ते न कदापि सत्वसादः।

(इ) गृहकृत्याय निवृत्यतां लघु ।

(ई) नृणां हि नीतिः क्व नु।

6. **द्वयोः** ससन्दर्भं व्याख्यानं लिखत— 2×3=6

(अ) अहो प्रभावः तपसाम्।

(आ) किमस्माकम् अमुना अभिवर्षेण ।

(इ) पूर्णाः ननु मम सकलाः अपि कामनाः ।

(ई) कमपि प्रतीकारं कुरुष्व ।

7. **त्रयाणां** प्रश्नानां समाधानं लिखत— 3×2=6

(अ) कस्याः पतनं पृथिवी न सहिस्यति ।

(आ) पाण्ड्यराजः खड्गं कथं प्राप्तवान् ?

(इ) जन्मावधि किं न कुर्यात् ?

(ई) कानि यत्नतः गोप्यानि ।

(उ) नृपः किमिति निश्चयमागतः ?

(ऊ) भक्तः किमर्थं पुष्पवनम् अगच्छत् ?

8. **त्रयाणां** प्रश्नानां समाधानं लिखत— 3×2=6

(अ) शूद्रकस्य राजधानी का ?

(आ) एकस्मिन् दिने कृष्णः कान् ददर्श ?

(इ) नरेन्द्रः श्रीरामकृष्णं किमिति अपृच्छत् ?

(ई) चूडाला स्व पतिदेवं किमिति अवदत् ?

(उ) कः स्वर्गराज्यं आक्राम्यत्।

(ऊ) सहस्रलोचनः वीरं किमवदत् ?

9. **एकेन** वाक्येन समाधानं लिखत— 5×1=5

(अ) भगीरथः कुत्र तपः आतिष्ठत् ?

(आ) मधुरापुरीं कं प्रादुरभावयत् ।

(इ) कतिभिः दिनैः चाणक्यः नन्दान् अपातयत् ?

(ई) किं मृत्युः उच्चते ?

(उ) चन्द्रमती श्मशाने कीदृशं जनम् अपश्यत् ?

10. **एकेन** वाक्येन समाधानं दत्त— 5×1=5

(अ) शुकः केन रक्षितः ?

(आ) कृष्णचरितं केन विरचितम् ?

(इ) केन करः प्रेषितः ?

(ई) सिद्धपुरुषः कः ?

(उ) उज्जयिन्याः राजा कः ?

11. अधोनिर्दिष्टं कथां पठित्वा प्रश्नानां समाधानानि दत्त— 5×1=5

अस्ति कस्मिंश्चित् वने चतुरको नाम जम्बुकः। तेन कदाचिदरण्ये स्वयं मृतः गजः समासादितः। अथ तुष्टः सः तस्य समन्तात् भ्रमति स्म। परं कठिनां तस्य त्वचं दन्तैः भेत्तुम् न शशाक। अत्रान्तरे कोऽपि सिंहः तत्र आजगाम। तं दृष्ट्वा वञ्चकः चतुरकः साष्टाङ्गपातं प्रणिपत्य प्रोवाच।

"स्वामिन् भवत्पादसेवकोऽहं भवदर्थे गजम् इमं रक्षामि। तदयं भक्ष्यतां स्वामिना" इति॥

सिंहः प्राह—

जम्बुक! नाहमन्यहतं सत्वं भक्षयामि। तदेव ते मया प्रसादीकृतम् । अतः त्वमेव भक्षय" इति।

तत् श्रुत्वा जम्बुकः सानन्दमाह—"युक्तमेव स्वामिनो मृगेन्द्रस्य" इति। अथ सिंहः गतः।

**प्रश्नाः—**

(1) जम्बुकस्य नाम किम् ?

(2) जम्बुकेन अरण्ये कः समासादितः ?

(3) तस्य त्वक् कथमस्ति ?

(4) तत्र कः आजगाम ?

(5) सिंहः जम्बुकं प्रति किमाह ?

12. नामनिर्देशपूर्वकं **त्रीणि** सन्धत्त– 3×2=6

(अ) सद् + जनः

(आ) रामस् + षष्टः

(इ) सुप् + अन्तम्

(ई) तत् + नाम

(उ) नमः + ते

(ऊ) तत् + टीका

13. नामनिर्देशपूर्वकं **त्रीणि** विघटयत– 3×2=6

(अ) रामश्शेते

(आ) हरिष्टीकते

(इ) अजादिः

(ई) जगन्नाथः

(उ) तपोवनम्

(ऊ) निस्सन्देहः

14. **द्वयोः** शब्दयोः सविभक्तिरूपाणि लिखत– 2×6=12

(अ) वाक्

(आ) मनस्

(इ) भिषक्

(ई) यद् (पुलिङ्गः)

15. समासनामनिर्देशपूर्वकं **त्रयाणां** विग्रहवाक्यानि लिखत– 3×2=6

(अ) प्रतिदिनम्

(आ) गोहितम्

(इ) विद्याधनम्

(ई) त्रिभुवनम्

(उ) महाबलः

(ऊ) पितरौ

16. अधोरेखाङ्कितपदं शुद्धीकृत्य वाक्यं लिखत– 5×1=5

(अ) वानराः वृक्षमूले अतिष्ठत् ।

(आ) उपाध्यायः पाठान पाठयंति ।

(इ) वृक्षात् फलम् अपतन् ।

(ई) बालः ग्रहाणि अगच्छन् ।

(उ) अहं पाठान् पठावः ।